# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- नवम्बर/दिसम्बर-२०१६

| कक्षा – **शास्त्री-०३ सेमेस्टर-०५** | **प्रश्नपत्रम्- ०६** | गुणाः - ७० |
|---|---|---|
| विषयः – फलितज्योतिषम् | कोड – CC-3.5.10 | समयः – ११:०० तः ०२:०० |
| दिनाङ्कः – ३०/११/२०१६ | ग्रन्थः – सरलजन्मपत्रीविज्ञानम् | |

**प्रथमान्वितिः (युनिट - १)**

**प्रश्नः १ अधोलिखितश्लोकेभ्यः कयोश्चित द्वयोः ससन्दर्भं व्याख्यां कुरुत । 08**

**(क)** भाग्येनभवन्ति यवाः पुंसश्चांगुष्ठपर्वसुस्पष्टाः। पोषविशेषनिमित्तात्कर्मकृतं यशस्तु रङ्गौ स्यात् ।
सुतवन्तः श्रुतवन्तौ जायन्तेङ्गुष्ठमूलगैस्तु यवैः। मध्यगतैर्धनकाञ्चनरत्नाढ्या भोगिनः सततम् ॥

**(ख)** अत्रुटिताग्राः स्निग्धा ऋजवो मृदवः समास्तनीयांसः । अस्तोकदीर्घवहवस्तरङ्गिनोभूभुजां केशाः।
ऊर्ध्वा रुक्षा कपिलाः स्थूला विषमाः खरा विभिन्नाग्राः। अतिहस्वदीर्घकुटिला जटिला विरला दरिद्राणाम् ॥

**(ग)** गौरः श्यामः कृष्णो वर्णः सम्भवति देहिनां त्रेधा। आद्यौ द्वावपि शस्तौ शुभे न कृष्णो न सङ्कीर्णः ॥
पङ्गजकिञ्जल्कनिभो गौरः श्यामः प्रियंशुकुसुमसम। कृष्णस्तु कज्जलाभः स्निग्धः शुद्धोऽपि नो शस्तः ॥

**प्रश्नः २ अधोलिखितयोः कस्यचिदेकस्य उपरि निवन्धं लिखत 08**

**(क)** स्वरविचारः

**(ख)** सामुद्रिकशास्त्रस्य वैशिष्ट्यम् ।

**प्रश्नः ३ अधोलिखितेषु कयोश्चित् द्वयोः टिप्पणीं लिखतु । 04**

**(क)** जीवनरेखालक्षणम् (ख) ओष्ठलक्षणम्

**(ग)** नेत्रलक्षणम् (घ) भृकुटीलक्षणम्

**प्रश्नः ४ अधोलिखितेषु केषाञ्चित् पञ्चप्रश्नानाम् अतिलघूततरं लिखतु ॥ 05**

**(क)** सूर्यग्रहस्य स्थानं हस्ते कुत्र भवति?

**(ख)** हस्ते केतुग्रहस्य स्थानं कुत्र भवति?

**(ग)** शरीरस्य मुख्याङ्गगानि कानि ?

**(घ)** कठोरवक्षस्थलयुक्तजनानां फलम्

**(ङ)** उच्चहस्तभागयुक्तः मनुष्यस्य फलं किम्?

**(च)** सन्तानरेखास्थलं कुत्र भवति?

**(छ)** पितृमुखस्त्रीफलं किम्?

**द्वितीयान्वितिः (युनिट - २)**

**प्रश्नः ५ अधोलिखितेभ्युः कयोश्चिट् द्वयोःससन्दर्भं व्याख्यां कुरुत । 08**

**(क)** किञ्जरकिम्भनिभं स्यादवृत्तं शीर्षसमुन्नतं यस्याः सा भवति भूपपत्नी सौभाग्यैश्वर्यसुखसहिता ।
स्थूलेन भवति शिरसा विधवा दीर्घेण बन्धकी युवातः । विषमेण विमदुःखादौर्भाग्यवती विशालेन ॥

(ख) तिलकं छांछनमंथवां हृदि रक्ताभं विलोक्यते यस्याः। सा धनधान्योपेता पति प्रिया जायते पत्नी ॥
रक्तं तिलकं लांछनमपसव्यपयोधरे भवति यस्याः। पुत्रि चतुष्टयं सा सुतत्रयं चाङ्गना सूते।

(ग) लम्बा विपुला कर्णद्वितयी मिलिता शुभा युताऽऽवर्तः। दोलायुगलातिरतिप्रीतिं दम्पतिकृते युगपत्।
रोमोपगता यस्याः शष्कुलिरहिता च नो शस्ता। कुटिला कृशा शिराला नारी सा जायते निन्द्या ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु। 08**

(क) तिललक्षणम्

(ख) स्त्रीगतिविचारः

**प्रश्नः ७ अधोलिखितेषु कयोश्चिट द्वयोः टिप्पणीं लिखतु। 04**

(क) केशलक्षणम् (ख)पाद्मिनीलक्षणम्।

(ग) शङ्खिनीलक्षणम् (घ) ललाटलक्षणम्

**प्रश्नः ८ अधोलिखितेषु केषाञ्चित् पञ्चप्राश्नाम् अतिलघूत्तरं लिखतु। 05**

(क) वृत्ता-तन्वी-भ्रूयुगली-कज्जलछायायुक्तभ्रुफलं किम्?

(ख) रेखारहितसुस्पष्टस्वस्तिकचिन्हालंकृतभालस्य फलं किम्?

(ग) बृहशिरयुक्तस्त्रीफलं किम्?

(घ) अतिशयदीर्घस्थुलैःस्त्रिकेशफलं किम्?

(ड) दीर्घाङ्गयुक्ततरुण्या: आयूफलं किम्?

(च) स्थूलनितम्बस्थूलस्तन्स्थूलकपोलयुक्तास्त्रीफलं किम्?

(छ) स्त्रीणां प्रकाराः कति विधा भवन्ति?

## तृतीयान्वितिः (युनिट - ३)

**प्रश्नः ९ अधोलिखितश्लोकेभ्यः कयोश्चित द्वयोः ससन्दर्भं व्याख्यां कुरुत। 08**

(क) प्रश्नाक्षरं द्विगुणितं वारसंख्या समन्वितम् पञ्चभिर्गुणितं तच्चपिंडं मुनिभिराभजेत ॥
एकशेषे बैलम्ब्यात्कार्यसिद्धिर्द्विवेदयोः। तत्क्षणात्पञ्चभि: षड्भि: कार्यनाशस्तु संप्तभिः।

(ख) जीवनेमरणे क्षेपाश्चत्वारिंशत्प्रकीर्तिताः। अथभागस्त्रिभिर्ग्राह्यः शेषाङ्केनफलं स्मृतम्।
एकेन जीवनं वाच्यं कष्टसाध्यं द्विशेषके। शून्ये तु मरणं प्रोक्तं ज्ञातव्यं सर्वदा बुधैः

(ग) ध्वजे सूर्यश्च विज्ञेय: धुम्रेभौमस्तथैव च। सिंहे शुक्रश्च विज्ञेः श्वाने सौम्यस्तथैव च॥

**प्रश्नः १० अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु। 08**

(१) गमनागमनसम्बन्धी विचारः।

(२) बन्धनमुक्तिप्रश्ननिरुपणम् ॥

**प्रश्नः ११ अधोलिखितयोः कस्यचित् एकस्य उपरि टिप्पणी लिखतु। 02**

(क) लाभालाभप्रश्नः (ख) गर्भोस्तिनवेति प्रश्नः।

**प्रश्नः १२ अधोलिखितेषु कयोश्चित् द्वयोःअतिलघूत्तरं लिखतु। 02**

(क) आग्निकोणः कुत्र भवति? **(ग)** ध्वजायस्य स्वामिनः ग्रहः कः?

(ख) प्राची-प्रतीची-महेशी-कौवेरीदिक्षु प्रश्नाः कुर्वन्तिचेत् फलं किम्? **(घ)** ध्वजादयायानां संख्या का?